**A-I/3/1322/22**

**प्रथमसत्रार्द्धम्**

**तृतीयपत्रम्**

**अद्वैतवेदान्तः**

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. सम्प्रसादशब्दस्य निर्वचनपुरस्सरं तस्यार्थं लिखत।
2. दहराधिकरणस्य सर्वाणि सूत्राणि लिखत।

**अथवा**

प्रकृत्यधिकरणस्य सर्वाणि सूत्राणि लिखत।

3. 'द्युभ्वादि' इत्यत्र आदिपदेन के परामृश्यन्ते?
4. सर्वगतस्यापि परमात्मनः किमपेक्ष्य अङ्गुष्ठमात्रत्वमुच्यते?
5. तदुपर्यपि बादरायणः सम्भवात् इत्यत्र उपरिशब्देन के निर्दिश्यन्ते?
6. 'आनुमानिकमप्येकेषाम्:........' इतीदं सूत्रं पूरयत।

**अथवा**

अधिकरणलक्षणं लिखत।

7. अनुकृत्यधिकरणस्य विषयवाक्यं लिखत।

**अथवा**

वाक्यान्वयाधिकरणस्य विषयवाक्यं लिखत।

8. सिद्धान्ते लोहितशुक्लकृष्णशब्दवाच्यानि कानि भवितुमर्हन्ति?
9. देवानां शास्त्राधिकारविषये जैमिन्याचार्यः किं मन्यते?
10. जगतः उपादाननिमित्तकारणयोः भेदः स्वीक्रियते चेत् किमुपरुध्यते?
11. 'यथाव्यपदिष्टोक्तेः' इत्यत्र जगत्कारणत्वव्यपदेशः कीदृशः?
12. 'अतिरेकाच्च' इत्यत्र पञ्चविंशतिसंख्यायाः अतिरेकः काभ्यामुक्तः?

**अथवा**

तात्पर्यलिङ्गानि लिखत।

13. आश्मरथ्याचार्यस्य अभिप्रायावेदकं सूत्रं लिखत।

14. 'व्याख्याता व्याख्याताः' इति पदाभ्यासः किं द्योतयति ?

15. 'तदधीनत्वादर्थवत्' इत्यस्मिन् सूत्रे कस्य तदधीनत्वमुच्यते ?

**अथवा**

आनुमानिकं नाम किम् ?

(5×6=30)

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।**

16. द्युप्रभृतीनाम् आयतनत्वेन श्रूयमाणं किमिति विचारयत।

**अथवा**

प्रमिताधिकरणस्य तात्पर्यं लिखत।

17. शब्द इति चेन्नात.......इति सूत्रं व्याख्यात।

**अथवा**

'उत्तराच्चेदाविभूतस्वरूपस्तु' इतीदं सूत्रं व्याख्यात।

18. संख्योपसङ्ग्रहाधिकरणस्य सारांशं लिखत।

**अथवा**

किं प्राणो भूमास्यादुत परमात्मेति ससूत्रं व्याख्यात।

19. 'आत्मा द्रष्टव्य' इत्यत्र आत्मशब्दार्थविषये विद्यमानानि सर्वाणि मतानि प्रदर्शयत।

20. ब्रह्मणः जगदुपादानत्वप्रतिपादकम् अधिकरणं विवृणुत।

(1×20=20)

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।**

21. देवताधिकरणम्।

**अथवा**

बालाक्यधिकरणम्।

**अथवा**

श्रीमच्छङ्कराचार्याणां भाष्यस्य विषये प्रबन्धं लिखत।